# Shri Triguneshvara Shivastotram

# શ્રીત્રિગુણેશ્વરશિવસ્તોત્રમ્

## Document Information

Text title : Triguneshvara Shivastotram

File name : triguNeshvarashivastotram.itx

Category : shiva

Location : doc_shiva

Transliterated by : Aaditya Kalyanaraman aadityakalyaan at gmail.com

Proofread by : Aaditya Kalyanaraman aadityakalyaan at gmail.com, NA

Latest update : December 8, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 8, 2020

*sanskritdocuments.org*

# શ્રીત્રિગુણેશ્વરશિવસ્તોત્રમ્

આદર્શ ચિક્કણ-કપોલતલં સુનાસં
ચઞ્ચત્બૃહચ્છ્વયુગં સ્વલિનીલકણ્ઠમ્ ।
ભોગોપમપ્રથિતસુન્દરદીર્ઘબાહું
પદ્માસને સમુપવિષ્ટમહં સ્વતુષ્ટમ્ ॥ ૧॥

શાન્તં ત્રિનેત્રમલિકેબ્જકલાં વહન્તં
નાગેન્દ્રચર્મવસનં ભુજગોપવીતમ્ ।
અન્તર્બહિશ્ચ રમણીયતમસ્વરૂપં
વિદ્યાઽમૃતાઽભયવરાઽઽશ્રયદાનદક્ષમ્ ॥ ૨॥

ગૌરીં ગણેશસહિતાં દધતં નિજાઙ્ગે
ગૌરં પ્રસન્નમુખમમ્બુજલચનાઢ્યમ્ ।
ગઙ્ગાં સ્વમૂર્ધનિ જટાપટલે દધાનં
ધ્યાયામિ તં હૃદિ શિવં ત્રિગુણેશ્વર સ્વમ્ ॥ ૩॥

બ્રહ્મા હરિર્હર ઇતિ ત્રિગુણીમતીત્ય
યસ્તન્મયો વરકલો જયતિ ત્રિલોક્યામ્ ।
વિશ્વપ્રપઞ્ચરચનાચતુરાય મહ્યં
તસ્મૈ નમો ભગવતે ત્રિગુણેશ્વરાય ॥ ૪॥

યં વૈદ્યનાથ ઇતિ વન્દ્યજના વદન્તિ
મૃત્યુઞ્જય યમિહ મર્ત્યજનાઃ સ્તુવન્તિ ।
શં  કાઙ્ક્ષિણઃ સ્વમિહ શઙ્કરમામનન્તિ
તસ્મૈ નમો ભગવતે ત્રિગુણેશ્વરાય ॥ ૫॥

વાચો બૃહસ્પતિમમ નિગદન્તિ તિસ્રો
વેદત્રયો સતતમેન મિહ સ્તવીતિ ।
અગ્નિત્રયી જ્વલતિ યં શ્રિતવત્યજસ્રં
તસ્મૈ નમો ભગવતે ત્રિગુણેશ્વરાય ॥ ૬॥

ધામયત્રી પરમધામનિ સાઽપિ યસ્મિન્
વિશ્રાન્તિમેતિ પરનિર્વૃતિભાવરમ્યે ।
સ્વેભ્યો દદાતિ કૃપયા તદપિ પ્રસન્ન-
સ્તસ્મૈ નમો ભગવતે ત્રિગુણેશ્વરાય ॥ ૭॥

શક્તિત્રયો ઘનતપાઽશ્રયતે યતોઽમું
તુર્યોઽપિ પઞ્ચતનુતે સતતં કૃતીઃ સ્વાઃ ।
પઞ્ચાનનઃ સુરનરાઽસુરસઙ્ઘપૂજ્ય-
સ્તસ્મૈ નમો ભગવતે ત્રિગુણેશ્વરાય ॥ ૮॥

વૈભૂત્યવાંસ્ત્રિદિવસેવિતપાદપોઽઘ
નાકાર્થિનાં વિજયતે સુખદઃ પરોઽર્થમ્ ।
વહ્નીન્દુસૂર્યનયનઃ પરમાર્થસાર-
કલ્પઃશ્રિયેઽસ્તુ સ સતાં ત્રિગુણેશલીલઃ ॥ ૯॥

સ્વનિર્મિતેન સ્તોત્રેણ પ્રીણ યઁસ્ત્રિગુણેશ્વરં
શમિચ્છતિ સમસ્તાનામાર્ચામૃતવાર્ભવઃ ॥ ૧૦॥

ઇતિ આચાર્યાઽમૃતવાગ્ભવપાદાઃ વિરચિતં શ્રીત્રિગુણેશ્વરશિવસ્તોત્રં સમ્પૂર્ણમ્ ।

Encoded and proofread by Aaditya Kalyanaraman aadityakalyaan at gmail.com

*Shri Triguneshvara Shivastotram*

pdf was typeset on December 8, 2020

Please send corrections to *sanskrit@cheerful.com*